Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ चिदम्बरपञ्चाक्षरमन्त्रप्रसङ्गात् गरुडपञ्चाक्षरमन्त्रोऽपि लिख्यते —

काश्यप ऋषिः । पङ्क्तिः छन्दः । श्रीगरुडो देवता । क्षां हृत् । क्षीं शिरः । इत्याद्यङ्गानि । ध्यानम् —

अमृतकलशहस्तं कान्तिसंपूर्णदेहं
सकलविबुधवन्द्यं वेदशास्त्रैरचिन्त्यम् ।
[2] विबुधसुलभपक्षैर्धूयमानाण्डगोळं
सकलविषविनाशं चिन्तयेत्पक्षिराजम् ॥

क्षिप ओं स्वाहा । इति मन्त्रः । अनेन मन्त्रेण जलसेचनादिना विषनाशो भवति ॥

अथ गरुडपञ्चाक्षरमन्त्रप्रसङ्गात् गरुडपञ्चाक्षरयन्त्रमपि मन्त्रसारोक्तं लिख्यते —

मध्ये तारं साध्ययुक्तं लिखेत्कोणेषु पञ्चसु ।
क्षाद्यर्णान्पञ्च तद्बाह्ये वसुपत्रोदरे ततः ॥

प्रीं त्रीं ठः चं हंसस्सोहं इति वर्णान् क्रमाल्लिखेत् ।
तद्बाह्ये तत्त्वगरुडमन्त्रेणावेष्ट्य तद्बहिः ॥

मातृकार्णैश्च संवेष्ट्य भूपुराश्रिषु च क्रमात् ।
आग्नेये ठं निर्ऋत्यां वं वायौ हंसः शिवे ततः ॥

१ चरणं इति ख, ग, पाठः । २ विविधसुलभ इति ख, ग, पाठः ।

यथावकाशं कुगृहे यद्यनन्तं महामनुम् ।
इत्येवं गारुडं यन्त्रं प्रोक्तं सर्वविषापहम् ॥

ताम्रपट्टे समालिख्य स्थापितं निजवेश्मनि ।
सर्पानुचाटयत्याशु देशाद्देशान्तरं क्षणात् ॥

यद्यनन्तकद्रूतोसीत्यादिगारुडोपनिषदुक्त अष्टनागविषयो यद्यनन्तमन्त्रः । तत्वगरुडमन्त्रः —

ओं नमो भगवते तत्वगरुडाय अमृतकलशोद्भवाय विष्णुवाहनाय वालखिल्यानुजाय .हंससहचराय वासवोद्यानसंहननाय वज्रनखतुण्डवज्रपक्षाल॰ कृतशरीराय विनतानन्दनाय दुष्टसर्पगर्वविषहननाय नागान्तकाय असुरान्तकाय *यौं म्यौं दुष्टविषं छिन्धि छिन्धि आवेशय आवेशय दुष्टग्रहं छिन्धि छिन्धि आवेशय आवेशय असुरग्रहं वा यक्षग्रहं वा देवग्रहं वा ग्रथनग्रहं वा गाढशृङ्खलग्रहं वातिकग्रहं वा पैत्यकग्रहं वा शैत्यग्रहं वा स्कन्दग्रहं वा विनायक-ग्रहं वा सोमग्रहं वा सूर्यग्रहं वा एकाहिकग्रहं वा द्व्याहिकग्रहं वा चातुर्थिक-ग्रहं वा ज्वरग्रहं वा यदि रुद्रग्रहं वा यदि रुद्रलोकग्रहं वा शीघ्रमावेशयावेशय हन हन दह दह मथ मथ विध्वंसय विध्वंसय चट चट प्रचट प्रचट हुं ख (फट्) रुद्र आज्ञापय स्वाहा । अवशिष्टः स्पष्टार्थः॥

अस्यैव गरुडपञ्चाक्षरमन्त्रस्य जपपूजादिकं प्रकारान्तरेण लिख्यते —

दक्ष ऋषिः । पङ्क्तिः छन्दः । लक्ष्मीशसहितश्रीगरुडो देवता । ओं क्षि ओं हृत् । ओं पं ओं शिरः ओं ओं ओं शिखा । ओं स्वां ओं कवचम् । ओं हां ओं नेत्रम् । ओं क्षिप ओं स्वाहा अस्त्रम् ॥

मूर्धास्यहृदयनाभौ पादयोरक्षरान् न्यसेत् ।
नाभिपादशिरोवक्त्रहृदयेषु स्थितिं न्यसेत् ॥

---

*यौं म्यौं, इति ख, ग, पाठः । फट्यौं म्यौं इति ङ पाठः ।

पादादिमूर्धपर्यन्तं संहारन्यासलक्षणम् ।

गारुडकल्पोक्तम् ॥

संहारपूर्वः सृष्ट्यन्तो वर्णिनामुपवर्ण्यते ।
संहारपूर्वः स्थित्यन्तो गृहस्थानामुदाहृतः ॥

वानप्रस्थाश्रमादीनां यतीनां यतचेतसाम् ।
द्वयोरन्यतरस्यान्ते संहारस्समुदाहृतः ॥*

---

* अयमधिकः पाठः ख मातृकायां परं भवति —

गरुडपञ्चाक्षरस्याङ्गमन्त्रान्तरम् —

ज्वल ज्वल महामते स्वाहा हृत् । गरुडचूडामणे स्वाहा शिरः । गरुडशिखायै स्वाहा शिखा । गरुडप्रभञ्जन प्रभञ्जन प्रभेदन प्रभेदन मर्दन मर्दन कवचम् । उग्ररूपधारक सर्वसर्पभयंकर भीषय भीषय सर्पं (र्पान्) दह दह भस्मीकुरु (भस्मी) कुरु स्वाहा नेत्रम् । अप्रतिहतशासन हुंफट् स्वाहा अस्त्रम् । गरुडपञ्चाक्षरमन्त्रस्य द्वादशलक्षजपः ॥

घृतेन वा घृतसिक्तेन शालिपिष्टेन वा दशांशं होमः ॥

अथ पूजाविधिः —

वैष्णवपीठे समावाह्य, अङ्गैः प्रथमावृतिः । ओं सुं सुपर्णाय नमः । ओं गं गरुडाय नमः । ओं वैं वैनतेयाय नमः । ओं तां तार्क्ष्याय नमः । इति दिग्दलेषु । ओं लं लक्ष्म्यै नमः । ओं कीं कीर्त्यै नमः । ओं जं जयायै नमः । ओं मां मायायै नमः । इति विदिग्दलेषु इति द्वितीयावृतिः । ओं कुं कुमुदाय नमः । ओं कुं कुमुदाक्षाय नमः । ओं पुं पुण्डरीकाक्षाय नमः । ओं वां वामदेवाय० ओं सं सनकाय० ओं सं सनत्कुमाराय० ओं शं शङ्कुकर्णाय० ओं सं सर्वनेत्राय० ओं सुं सुमुखाय० ओं सुं सुप्रतिष्ठाय० इत्येतैर्दशभिः तृतीयावृतिः । इन्द्रादिभिश्चतुर्थी ॥

हस्तौ तु विमुखौ कृत्वा ग्रथयित्वा कनिष्ठिके ।
तर्जन्यौ प्रसृते श्लिष्टे श्लिष्टावङ्गुष्ठकौ तथा ॥

मध्यमानामिके द्वे तु द्वौ पक्षाविव चिन्तयेत् ।
एषा गरुडमुद्रा स्यादशेषविषनाशिनी ॥

अथ गरुडपञ्चाक्षरस्य फलमाह —

भूतपिशाचपैत्यगरळरोगोन्मादज्वरापस्मृतिग्रन्थिच्छेदादिमहोदराश्मपवनचित्रादि रोगापहम् ॥

अथ गरुडमन्त्रप्रसङ्गात् कल्पान्तरोक्तप्रकारेण आशुगरुडमन्त्रोऽपि लिख्यते —

शङ्कर ऋषिः । जगती छन्दः । आशुतार्क्ष्यो देवता । ग बीजम् । स्वाहा शक्तिः । सर्वविषहरणे विनियोगः । गां हृत् । गीं शिरः । इत्याद्यङ्गानि । ध्यानम् —

आजानोस्तप्तहेमप्रभममलहिमप्रख्यमानाभि तस्मा-
दाकण्ठं कुङ्कुमाभं भ्रमरकुलमिव श्याममामूर्धकेशम् ।
ब्रह्माण्डव्याप्तदेहं द्विभुजमहिवरैर्भूषणैर्भूषिताङ्ग
पिङ्गाक्षं तीक्ष्णदंष्ट्रं वरदमभयद तार्क्ष्यमुग्रं नमामि ॥

ओं श्रीं श्रीं गरुडाय गरुडाय महागरुडाय समस्ताण्डाण्डबहिस्त्रैलोक्यनायकाय नागशोणितदिग्धाङ्गाय ओं पक्षिराजाय विष्णुवाहनाय सर्वसर्पान् संहर संहर मठ मठ मर्दय मर्दय मोटय मोटय लोटय लोटय त्रोटय त्रोटय भ्रामय भ्रामय मुञ्च मुञ्च आकर्षय आकर्षय आगच्छ आगच्छ आवेशय आवेशय सिद्धय सिद्धय शीघ्र शीघ्र समस्तभूतवेतालान् नाशय नाशय सर्वग्रहान् नाशय नाशय सर्वशत्रून् विनाशय विनाशय सर्वसर्पान् संहर संहर स्वाहा इति मन्त्रः । षट्सप्तत्युत्तरशताक्षरोऽयं मन्त्रः । *विषहरणभूतनिग्रहप्रधानोयं मन्त्रः ॥ द्वादशसहस्रजपः । नागरूपपिष्टेन तिललाजपायसघृतगुडैश्च शतांशं (दशांशं) होमः । पूर्वोक्तवत् पूजा ॥

* अत्र अक्षरसंख्या तु यथामातृके अधिकतया भवति । निर्दिष्टाक्षरात्मकत्वेन समर्थनं तु बुद्धिमद्भिरूह्यम् ।

अथ यन्त्रम् –

पट्कोणान्तरितान्निवायुलिखितं मायां च सप्तार्णकं
कोणेष्वश्रिषु साध्यवर्णसहितं तद्बाह्यचिन्तामणिम् ।
पं शं शक्तिसबिन्दुकं च विलसद्बाह्येऽङ्कुशेनावृतं
तारेणावृतबिन्दुनादसहितं सर्पग्रहादीन् हरेत् ॥

अथवा,

पड्रेखान्तरितानि वायुमनुयुक् मध्याक्षरद्वादशं

कोणेष्विति पाठविशेषः ।

एतच्चक्रं तु संपूज्य जपेदष्टोत्तरं शतम् ।
प्रयोगकाले संप्राप्ते ध्यात्वा भूतं विलोकयेत् ॥

तत्रालोकनमात्रेण क्षिप्रसिद्धिर्भविष्यति ।

अस्यार्थः — प्रथमं पट्कोणं विलिख्य, तन्मध्ये रमित्यग्निबीजं च य वायुबीजं च ह्रीं इति मायाबीजं च अन्तरन्तर्विलिख्य, ओं विष्णुवाहनाय सप्तार्णकेनावेष्टयेत् । अथवा कर्णिकायां रं इत्याग्निबीजं विलिख्य, तदन्तर्वायुबीजं विलिखेत् । तद्बहिः ओं पक्षिराजाय विष्णुवाहनाय इति द्वादशाक्षरेण वेष्टयेत् इति । पुनः पट्सु कोणेषु साध्यसहितवह्निबीजं विलिख्य, तत्कपोलेषु स्क्ष्म्रयौऊं (स्क्ष्म्र्य् ऊं) इति चिन्तामणिबीजं विलिखेत् । पुनः आं इति पाशाक्षरेण वेष्टयेत् । तद्बहिः क्रों इत्यङ्कुशबीजेन वेष्टयेत् । तद्बहिः बिन्दुनादसहितेन तारेण वेष्टयेत् । तारं प्रणवं । बिन्दुरित्यनुस्वारः । नादमिति प्रणवरेखाग्रम् । कुण्डलीकृत्यान्तःप्रविष्टमिति ॥

यन्त्रान्तरत् —

द्विरष्टकोष्ठमालिख्य प्रत्येकादशवर्णकम् ।
त्रिशिखं चतुरस्राग्रे तद्रेखाग्रे तु नामकम् ॥

पार्श्वे(वाम)पांसुनि संलिख्य प्राणानावाह्य तत्र तु ।
शत्रोस्तु दिङ्मुखो भूत्वा जपेदष्टोत्तरं शतम् ॥

तद्रूरमदर्शनादेव रिपुं प्रति स गच्छति ।

अस्यार्थः — षोडशकोष्ठान्विलिख्य प्रतिकोष्ठं मूलमन्त्रवर्णान् एकादशवर्णशो विभज्य विलिखेत् । रेखाग्रेषु शूलमालिख्य शूलाग्रेषु साध्यनाम विलिखेत् ॥

यन्त्रान्तरम् —

शिखिऋतुवसुकोणं चाष्टपत्रं भुवं च
ऋतुशतशशिसाग्निर्भास्करं व्योमकं च ।
सकलमनलवायुस्तद्बहिस्साध्यशक्तिं
धृतमृतसुतवन्ध्यागर्भदं तार्क्ष्यमेतत् ॥

अस्यार्थः — प्रथमं त्रिकोणं तद्बहिष्षट्कोणं तद्बहिरष्टकोणं तद्बहिरष्टदळं तद्बहिश्चतुरश्रं च विलिखेत् । तत्र त्रिकोणकोणेषु इन्द्रबीजं लमिति विलिखेत् ।

षट्कोणकोणेषु ळ्रं इति चन्द्रबीजं विलिख्य, अष्टकोणेषु रं इत्यग्निबीजं विलिख्य, अष्टदळेषु सूर्यबीजं ह्रीं इति विलिख्य, भूपुरकोणेषु चतुरश्रेषु आकाशबीजं हं इति विलिख्य, पुनस्त्रिकोणषट्कोणाष्टकोणाष्टदळभूपुरेषु अग्निबीजं वायुबीजं(च) सर्वत्र विलिखेत् ॥

अस्यत्रोपदेशः — प्रथममनलं विलिख्य तदन्तर्वायुबीजं विलिख्य तदन्तस्तत्र तत्रोक्ताक्षराणि विलिखेत् । तद्बहिर्भुवनेशीपुटितसाध्यनामवर्णैः वेष्टयेत् इति ॥

यन्त्रान्तरम् –

षट्कोणं विलिखेत्पूर्वं तदग्रे शूलमालिखेत् ।
वर्तुळं च तु तन्मध्ये मध्ये वायुं विलिख्य तु ॥

षट्कोणे तु लिखेद्बहिः शूलाग्रेष्वथ नामकम् ।
अभिमन्त्र्य चतुर्वारं तत्तोयेनाभिषेचयेत् ॥

तोयदर्शनमात्रेण धावति भुवमम्बिके ।